# द्वितीयपत्रम्

# साहित्यम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. विंशतिः प्रश्नाः समाधेयाः। (20×2=40)

1. "सौरभेयीम्" इत्यस्य कोऽर्थः?
2. "मागधी" इत्यनेन पदने किं संलक्ष्यते?
3. "निरीतयः" इत्यत्र कः समासः?
4. लोध्रद्रुममिव कम् अपश्यत्?

अथवा

"शालप्रांशुः" कस्येदं विशेषणम्?

5. सम्बन्धः कीदृशो भवति?
6. "रघूणामन्वयम्" इत्यत्र अन्वयशब्दस्य अर्थं लिखत।

अथवा

"निर्दिष्टां कुलपतिना स पर्णशालाम्" इत्यस्मिन् श्लोके किं नाम छन्दः?

7. "पिबेरपः" अत्र सन्धिविच्छेदो विधेयः।
8. कामधेनुः कुत्र वसति स्म?

अथवा

दम्पती कौ?

9. "जगत:" इत्यत्र का विभक्ति: ?

10. रघुवंशं महाकाव्यं काव्यं वा ?

11. को देशकालज्ञ: ?

अथवा

"शासितु:" पदस्यास्य व्युत्पत्तिं लिखत।

12. प्रथमो मनु: क: ?

13. का अद्रेस्तनया ?

अथवा

मेदिनी कीदृशी वर्तते ?

14. "शर्मणे" इत्यस्य कोऽर्थ: ?

15. पुत्रप्राप्त्यर्थं राजा दिलीप: कुत्र गतवान् ?

16. सिंहस्य नाम किमासीत् ?"

17. "उत्तिष्ठ वत्स !" इति कस्या: वचनम् ?

18. "वृद्धत्वं जरसा विना" कस्मिन् विषये इदमुक्तम् ?

19. "धुर्यान् विश्रामयेति" क: कं प्रति उक्तवान् ?

20. "हैयङ्गवीनम्" अस्य शब्दस्य तात्पर्यं लिखत।

ब.  पञ्च प्रश्ना: समाधेया:।  (5×8=40)

21. "पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनुः
दिनक्षपामध्यगतेव सन्ध्या॥"

अमुं श्लोकं पदच्छेदान्वयव्याख्याभावार्थपुरस्सरं व्याख्यात।

अथवा

नन्दिन्या: सौन्दर्यवर्णनं ग्रन्थोक्तदिशा कुरुत।

22. "द्वेष्योऽपि सम्मत: शिष्टस्तस्यार्त्तस्य यथौषधम्।
त्याज्यो दुष्ट: प्रियोऽप्यासीदङ्गुलीवोरगक्षता॥"

अस्य श्लोकस्य तात्पर्यं विलिखत।

अथवा

सान्ध्यकालीन गोसेवाप्रकारं विशदयत।

23. "फलानुमेया: प्रारम्भा: संस्कारा: प्राक्तना इव" वचनमिदं विस्तरेण व्याख्यात।

24. "शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥"

श्लोकमिमं व्याख्यात।

25. महर्षिवशिष्ठस्याश्रमवर्णनं ग्रन्थाधारेण लिखत।

अथवा

"क्व सूर्यप्रभवो वंशः? क्व चाल्पविषया मतिः?
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥"

पदच्छेदान्वयव्याख्याभावार्थपुरस्सरमिमं श्लोकं व्याख्यात।

**स. दीर्घोत्तरेण प्रश्नः समाधेयः।** (1×20=20)

26. रघुवंशमहाकाव्यस्य प्रथमसर्गस्य कथासारो लेख्यः।

अथवा

सिंहदिलीपयोः संवादं ग्रन्थोक्तदिशा लिखत।

अथवा

महाकविकालिदासस्य जीवनपरिचयो लेख्यः।